Shri Raghunatha Temple MSS. Library,
५० ८०
JAMMU

No. १३२८ क

Title नैमित्तिक पूजा

Author

Extent २० पत्र Age

Subject तन्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

नं० १८५० १२२५

5783

२२

२९

Complete

१२२

नं. ९३२६क

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰
पू॰ १

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे परमशिवाय नमः अथ
नैमित्तिकपूजा तत्र दीक्षितः आसन्नपूर्णाभिषेकः कृतपुरश्च
रणो नित्यार्चनानन्तरं नैमित्तिकार्चनं कुर्यात् तत्र विशेषदि
वसेषु क्रियमाणा महापूजा नैमित्तिकपूजेत्युच्यते विशे
षदिवसास्तु तन्त्रेषु पर्वत्वेनोक्तानि दिनानि तानि गुरुप
रमपरमेष्ठिगुरूणां जन्मवारतिथिनक्षत्राणि स्वजन्म
तिथिवारनक्षत्राणि विद्याप्राप्तिदिने गुरोः न्यासदिनमष्ट

© Dharmartha Trust J&K. Digitized by eGangotri

मीचतुर्दशीपूर्णिमामावास्यारविसंक्रान्तियुगादिदिना
न्तिथ्यनन्तरं विवाहसमरपीडोपपीडगमनदेशिकागम
नवीरमहायोगिदर्शनतीर्थगमनव्रतदीक्षायुत्सवदिना
नि विशेषदेवागमनदेवतादर्शनान्तरत्रितयसंपातदि
नानि चान्तरत्रयसंपातदिनानीति एकस्यान्तरस्य दिन
तिस्यान्तरत्वेनोदयान्तरत्वेन च दर्शनं यस्मिन् दिने तद्दिनं
विशेषपर्वतेषु दिनेषु नित्यपूजानन्तरं यथाबलं यथाश्र

© Dharmartha Trust J&K. Digitized by eGangotri

नै०
पू०
२

ह्रा यथाकालं यथादेशं यथाविभवविस्तरं वित्तशाठ्यरहितो यथोक्तद्रव्यैः यथागुरूपदेशं शक्तिसामयिकैः सार्धं विशेषपूजां कृत्वा यथाशास्त्रं गुरून् सामयिकांश्च परितोषयेत् अत्र गुरुपर्वसु गुरुपंक्तिपूजोक्रमान् वोद्ध गुरुसंख्याकान् साधकान् तत्तन्नाम्ना सर्वोपचारैः समभ्यर्च्य यथाशक्ति दक्षिणादानादिभिः परितोषयेत् चैत्रादिफाल्गुनांतेषु मासेषु द्वादशस्वपूर्णिमासु विशेषपूजा

© Dharmartha Trust J&K. Digitized by eGangotri

कुर्यात् तद्यथा तत्रादौ चैत्रे मासि पूर्णिमायां दमनकैः
पूजयेत् तत्र चैत्रशुक्लत्रयोदश्यां प्रातः साधकः कृतनित्यक्रि
त्यः साथे साधकैः सार्धं दमनकसमीपं गत्वा पूर्वोक्तचतु
ष्कल्पलताविद्याभिर्दमनकमभिमंत्र्य स्वासने समुप
विश्य प्राणायामत्रयषट्कस्थानादिकरषडंगन्यासांश्च विधा
य कामभस्मसमुद्भूतरतिवाष्पजलोद्भव ऋषिगंधर्वदे
वादिमोहनीय नमोऽस्तु ते सांवत्सरिकपूजायाः परिपूर्णं

© Dharmartha Trust J&K. Digitized by eGangotri

नै.
वृं.
3

त्वमिहृये दमनत्वंममाघ्राहि त्वमस्त्वचनमोस्तुते शिव
प्रसादसंभूतत्वमत्रसन्निहितोभव शिवकार्यसमुद्दिश्य
नेतव्योसि शिवाज्ञया इतिदमनकमामंत्र्य ततश्चकामदेवं
रतिंचतत्तन्मंत्रेणावद्यमानप्रकारेणध्यात्वा संपूज्यगृ
हमागच्छेत ततश्चतुर्दश्यांकृतनित्यकृत्यःसाधकःसा
यकैःसार्धपुनर्दमनकसमीपंगत्वा स्वमंत्रेणदमनकंस
मूलमुत्पाट्यास्त्रेणावगुंठ्यशिखिनागृहमानीय अघोरे

© Dharmartha Trust J&K. Digitized by eGangotri

पेंगें घोरे ह्रीं घोरघोरतरे श्रीं सर्वतः सर्वसर्वेभ्यो नमस्ते
रुद्ररूपेभ्यः फ्रीं ग्रीं इति मंत्रेण दमनकमभ्युक्ष्य पूजा
स्थाने कचित्पात्रे दमनं नवधा विभज्य मध्येष्टदिक्षु च
संस्थाप्य तन्मंत्रेण चंदनागुरुकर्पूरकुंकुमादिपंकैः सं
लिप्य हं नमः सं नमः क्षं नमः मं नमः लं नमः वं नमः
रं नमः यं नमः ऊं नमः इति नवधा विभक्तं दमनं मध्यादि
प्रादक्षिण्येन संपूज्य तथैवानंदेश्वरीबीजेन नवधा विभ

© Dharmartha Trust J&K. Digitized by eGangotri

८

नै. केनपूजयेत् ततोस्त्रेणासंरक्ष्यत्रिशूलमुद्रां बद्ध्वा कवचमंत्रे

पू. णदमनोपरिभ्रामयेत् ततोनूतनवस्त्रेणाच्छाद्य रहसिद

५ मनंस्थापयेदित्यधिवासनंचतुर्दश्यांरात्रौकुर्यात् ततःपौ

र्णमास्यांप्रातःस्नात्वानित्यपूजांनिर्वर्त्य सामयिकैःसार्धं

राज्ञोस्वस्तिवाचनपुरःसरं दमनंपूजास्थानमानीय पूर्वेद्यु

रधिवासनाकरणेचतुर्दश्यांसायंतनेप्रोक्तविधिनादमन

मामंत्र्यवापूर्णिमायामेवदमनमामंत्र्यानीयोक्तविधिना

© Dharmartha Trust J&K. Digitized by eGangotri

सद्योधिवासनं विधाय प्रातः सिंहरेण चतुरश्रहस्तद्वयवेदि
तेन नवयोनिचक्रं विधाय तस्य नवस्वयोनिषु स्वर्णादिरचितान्
नवकलशान् यवपुंजोपरि दीक्षाप्रकरणे वक्ष्यमाणविधिना
मध्ययोनौ देवीं हैमं वा कुंभं संस्थाप्य स्वासनपूजादिपीठपूजां
तं प्राग्वद्विस्तारतः संक्षेपतो वा कृत्वा पंचायतनक्रमी चेत्त
गणेशादीन् दमनैः संपूज्य स्वदक्षिणभागे सर्वतोभद्रमंड
लं वक्ष्यमाणप्रकारेण कृत्वा तदशक्तौ अष्टदलकमलं वा सिं

© Dharmartha Trust J&K. Digitized by eGangotri

१

नै.
पू.
८

हृदादिना कृत्वा तन्मध्ये अशोकतरुं पंचवर्णरजोभिरापूर्य
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन शोकार्तिं हर मे
नित्यमानंदं जनयस्व मे इत्यशोकतरुं प्रार्थ्य अशोकाय नमः इ
त्यशोकतरुं संपूज्य वत्सादि प्रलयांतो यः कालरूपो महाब
लः कलयत्यपि विश्वं यस्तस्मै कालात्मने नमः इति कालं च
संपूज्य अशोकतरोरधस्त्रिकोणमंडले मंडूकादिपरतत्त्वां
तं योगपीठं संपूज्य अष्टदलकेसरेषु स्वाग्रादि प्रादक्षिण्येन

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ सौभाग्यायै नमः हर्षायै नमः वर्षायै नमः पुष्ट्यै नमः
भ्रान्त्यै नमः प्रीत्यै नमः संग्रामायै नमः निर्वाणायै नमः का
मुकायै नमः इति मध्यान्तं संपूज्य ह्रीं सर्वशक्तिकमला
सनाय नमः इति समस्तपीठं संपूज्य तत्र बिन्दुत्रिकोणगर्भ
मष्टदलकमलं चतुरस्रेण वेष्टितं पूजामण्डलं कृत्वा त
त्र ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनङ्गः प्र
चोदयात् इति कामगायत्र्या कामदेवमावाह्यावाहनादि

नै॰ णप्रतिष्ठांते पाशांकुशपञ्चबाणमुद्राः प्रदर्श्य कामदेवं
सू॰ तेऽरुणमरुणवर्णं रक्तवस्त्राभरणमाल्यानुलेपनं वामदक्षि
6 णयो रतिप्रीतिभ्यां शोभितं पुष्पबाणोद्यत्पञ्चपरं वसंतसहि
तं ध्यात्वा ॐ पं क्लीं श्रीं ह्लीं कामाय नमः इति मंत्रेण गंधादिपं
चोपचारैः कामदेवं संपूज्य तद्वामभागे रतिं गौरवर्णां सर्वाल
कारभूषितां रक्तवस्त्रपरीधानां पद्मद्वयकरां ध्यात्वा श्रीं श्रीं श्रीं
क्लीं रत्यै नमः इति मंत्रेण रतिं पंचोपचारैः संपूज्य कामस्पद

© Dharmartha Trust J&K. Digitized by eGangotri

द्विणे भागे प्रीतिं श्यामवर्णां सर्वालंकारभूषितां रक्तवस्त्र
परीधानां तां हूलकरां ध्यात्वा ४ श्रीं ह्रीं ह्रीं क्लीं प्रीत्यै नमः
इति प्रीतिं पंचोपचारैः संपूज्य ततः कामदेवस्याग्रे कटब
वनमध्ये वसंतं गौरवर्णं वामहस्तेन सुधाकुंभं दक्षिण
हस्तेन नानापुष्पसमृद्धयं दधानं रक्तवस्त्राभरणभूषि
तं रक्तमाल्यानुलेपनं ध्यात्वा वं वसंताय नमः इति मंत्रेण
पंचोपचारैः वसंतं संपूज्य पुनर्मध्ये कामदेवं पुष्पांजलि

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰ नासंपूज्याष्टदलकेसरेषु अग्नीशासुरवायव्यमध्येच
पू॰ तुर्दिक्षुच ह्लांहृदयायनमः ह्लींशिरसेनमः ह्लूंशिखायै
नमः ह्लैंकवचायनमः ह्लौंनेत्रत्रयायनमः ह्लःअस्त्राय
नमः इतिषडंगानिसंपूज्याष्टदलेषुस्वाग्रादिप्रादक्षिण्ये
न कामायनमः भस्मशरीरायनमः अनंगायनमः मन्म
थायनमः वसंतसखायनमः स्मरायनमः इक्षुधनुर्धरा
यनमः पुष्पबाणायनमः इत्यष्टौकामान्संपूज्य बहिश्च

© Dharmartha Trust J&K. Digitized by eGangotri

त्राग्रे लोकपालांस्तदस्त्राणि च संपूजयेत् ततः पुनः कामदेवं
तन्मन्त्रेण संपूज्य धूपदीपादिकं दत्वा प्रणम्य कामदेवाय वि
द्महे पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात् इति काम
गायत्रीं यथाशक्ति जपित्वा समर्प्य नमोस्तु पुष्पबाणाय ज
गदानंदकारिणे मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय चेति
कामदेवं प्रणम्य मूलविद्ययाङ्गुष्ठादिकरषडङ्गन्यासान्
कृत्वा मध्ये कुंभे भगवद्देवीमावाह्य षोडशोपचारैः संपूज्य

© Dharmartha Trust J&K. Digitized by eGangotri

नै.
पू.

प्राग्वत्तिथिनित्यादिलोकपालांतान्क्रमेणदमनैः
संपूज्य आवाहितासिदेवपिसमयःकालेमयाशिवकर्त
व्यंतत्वयालाभंपूर्णंपर्वत्वदाज्ञया इतिविज्ञाप्यदेवींगंध
पुष्पादिभिःदमनैःपुनःसंपूज्य प्राग्वद्धूपदीपनैवेद्यानि
निवेद्य नैमित्तिकहोमंनित्यहोमोक्तविधिनासंकृतेग्नौ
नित्यहोमद्रव्यैःकेवलघृतेनवानित्यहोमसंख्यात्रिगुणां
कृत्वा प्राग्वद्राजोपचारमहदारात्रिककुमारीस्ववासि

© Dharmartha Trust J&K. Digitized by eGangotri

नीवटुकादिपूजां विधाय सर्वान्भोजन वस्त्रालंकार
दक्षिणांतांबूलादिभिः परितोष्य स्वगुरुं गोभूमिहिरण्य
वस्त्रालंकारपूजाप्रणतिभिः परितोष्य तदभावेतत्सु
तज्येष्ठकनिष्ठादीनन्यंवामहायोगिनंसंपूज्य दक्षिणा
दानादिभिः परितोष्य मूलविद्यांनित्यजपाद्द्विगुणंसंख्यं
जपित्वा अंगविद्याश्चापितथाजपित्वा देव्यैजपसमर्पणं कृ
त्वा पुनः पुनः प्रणम्य षोडशार्णंजगन्मातर्वीक्षितार्थेफ

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰ लप्रदे कामान्पूरय मे देवि कामं कामेश्वरि इति देवीं प्रा
पू॰ र्थ्य पुनः कामदेवं तन्मन्त्रेणादमनैः संपूज्य धूपदीपनैवेद्यता
१ म्बूलानि निवेद्य प्राग्वत्स्तुत्वा प्रणम्य कामदेवं सर्वसंनिधिं विसृ
ज्य पुष्पाञ्जलिमादाय समस्तचक्रचक्रेशि सर्वविद्यापारी
रिणि वेदमातर्ममाभीष्टं पूर्णमस्तु त्वदाज्ञया इति देवीं प्रा
र्थ्य पुष्पाञ्जलिं दत्त्वा प्राग्वद्देवीं विसृज्य श्रीपात्रे चोद्वासनता
दि प्राग्वद्यथागुरूपदेशं विधाय शक्तिसामयिकान्परितो

© Dharmartha Trust J&K. Digitized by eGangotri

च ब्राह्मणान् [illegible]रिदक्षिणाभोजनादिभिः परितोषयेदि
ति दमनपू[illegible]नविधिः ॥ अथ दमनपूजा यदि चैत्रपूर्णिमायां न
स्या[illegible]न तदा [illegible]कृष्णपक्षाष्टमीनवमीचतुर्दश्यन्यतमतिथौ
कार्या चैत्रमासि चेन्न भवेत् तदा वैशाखे ज्येष्ठे वा मासि प्रोक्तति
थिष्वन्यतमतिथौ कुर्यात् अथ चैत्रमासि पूर्णायामेव तत्का
लसंभवैः पुष्पैः सचंदनकर्पूरकुंकुमकल्हारैर्वसंतोत्सवपूजां
कुर्यात् अत्रापि नैमित्तिकपूजायां सर्वत्र पूजाद्रव्याणि पूर्वेषु

© Dharmartha Trust J&K. Digitized by eGangotri

२९

नै. र्निशिपविशेष्यानेकविस्यादेनिधाय मूलविद्ययाभ्युक्ष्य मूल
पू. विद्ययात्तद्दिननित्याविद्ययाचगंधपुष्पधूपदीपनमस्काराद्यैः
पंचोपचारैरभ्यर्च्याधिवासनंविधाय परेद्युः स्वनित्यक्रमार्चनां
10 तैःतैः सविशेषंपूजनंकृत्वा स्वगुरुपूजनंचकुर्यादितिसाधार
णमाधिवासनंपूजनंचसर्वत्रेत्येवं नैमित्तिकार्चनंतत्सर्वदारा
त्रावेवकार्यं नित्यार्चनंदिवाकुर्याद्रात्रौनैमित्तिकार्चनं उभयोः
काम्यकर्माणि चेतिशास्त्रस्यनिर्णयइतिकुलार्णववचनात्

© Dharmartha Trust J&K. Digitized by eGangotri

अत्र वैशाखे मासि पूर्णिमायां हिमजलैः कर्पूरकस्तूरी चं
दनोन्मिश्रैः शीतलोदकैर्वा प्रागवदधिवासनपूर्वकं विशेष
पूजां कुर्यात् अथ ज्येष्ठे मासि पूर्णिमायां विशेषपूजां विधाय
कदलीपनसाम्रफलैर्महानैवेद्यैर्देवीपरितोषं गुर्वादिपूज
नं च कुर्यात् आषाढे मासि पूर्णिमायां एलाकक्कोलजाती
फलकुंकुमान्वितैश्चंदनैः पूजयेत् अथ श्रावणे मासि पूर्णि
मायां पवित्रारोपणं कुर्यात् अथ श्रावणे मासीत्सपलक्षणं

© Dharmartha Trust J&K. Digitized by eGangotri

नै० मिथुनसंक्रमणमारभ्य तुलासंक्रान्तिपर्यन्तं पवित्रोत्सव
पू० स्य कालः तिथयस्तु पक्षद्वयेपि चतुर्थ्यष्टमी नवमी चतु
र्दशी पूर्णिमा चेति अत्रोत्तरोत्तरं गौणः कालः पवित्राणि सु
वर्णरूप्यताम्रपट्टसूत्रक्षौमसरीमयसूत्रदर्भमुञ्जशणसू
त्रवल्कलकर्पासमसूत्रेष्वन्यतमेन सूत्रेण कुर्यात् कर्पास
सूत्रं चेत्सुवासिनीभिः कृतं त्रिगुणं त्रिगुणीकृतं नवसूत्रमे
कस्मात्तेन कल्पितैर्भक्तिसंख्यैः सूत्रैः पवित्राणि कुर्यात्

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र षोडशांगुलदैर्घ्याणि षोडशसूत्रैः षोडशग्रंथियुक्ता
नि नवांगुलदैर्घ्याणि नवसूत्रान्नवग्रंथियुक्तानि वा यस्मि
न्नावरणे यावत्यः शक्तयस्तत्संख्यसूत्रग्रंथियुक्तानि वा
पवित्राणि कुर्यात् तत्रावरणशक्तिसंख्यांगुलादिपक्षे मू
लदेव्याः षोडशांगुलायामादिकं पंचदशानित्यानां पंच
दशांगुलादिकं वाराहीकुरुकुल्ययोश्च मूलदेव्याश्च पवित्रा
णि कुर्यात् अन्यानामष्टांगुलदैर्घ्यसूत्रग्रंथियुक्तानि।

© Dharmartha Trust J&K. Digitized by eGangotri

३९ स

नै. रुपंक्तित्रयम्पनंतन्तवायोनम्गुरुमंडलांगुलादिकंनवांगुला
स. दिकंवापवित्राणिकुर्यात् अथश्रीचक्रे [illegible] हंदसमसं
18 ख्यातानिपवित्राणि उक्तपद्धेषकपद्धानुसाराणिकृत्वाष्टो
नरयानसरत्नग्रंथियुक्तमेकंवितानानात्रम्जाविष्टरमानदै
र्घ्यं आत्मनःक्रमागमशिष्याणांचस्कंधादिनाभिपर्यंत
दैर्घ्यमंगीकृतपद्धानुसारिसरत्नग्रंथिकमन्येषांसामान्य
योगिशाकीनांपकग्रंथिनवसरत्नयुक्तानिमंडपस्यैकस्त्रे

© Dharmartha Trust J&K. Digitized by eGangotri

णावेष्टनप्रमाणं ग्रंथिरहितं पवित्रं कुर्यात् अत्रावरणश
क्तिसमसंख्यं [illegible]दि पक्षे आत्मनः क्रमसप्तशिष्याणां च मू
ले देवीवत् अत्र पवित्रेषु ग्रंथयो बालामंत्रेणैकवर्णमंत्रेण वा
कार्याः ग्रंथिषु सूत्रवेष्टनं यथेष्टमेवेति इत्थं पवित्राणि विधा
य पवित्रारोपणदिनात् पूर्वदिने साधकः कृतनित्यकृत्यो रा
त्रौ साधकैः सार्धं पवित्राणि पूजास्थानमानीय पवित्रस्थाने सिं
हासनादिना चतुरस्रं स्वहस्तवेष्टितं नवयोनिचक्रं कृत्वा कचित्पात्रे

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰ तस्मिन्मंडले यवित्राणि गोरोचनाकुंकुमरक्तचंदनकस्तूरी कुं-
१९ कुमकर्पूरपंकैः प्रतिसूत्रमेकैकं लिख्या लाक्षागैरिकाद्यैर्ग्र-
थिस्थाने च विचित्रितानि संस्थाप्य कार्पाससूत्रकृतानि चेत्यति
चित्राणि तदा तेषां नवसु सूत्रेषु ॐकारायनमः चंद्रमसेनमः
वह्नयेनमः ब्रह्मणेनमः नागायनमः गुरवेनमः रवयेनमः
सदाशिवायनमः सर्वदेवेभ्योनमः इति देवताः संपूज्य शिरो
मंत्रेणाभिमंत्र्य अस्त्रमंत्रेणाभ्युक्ष्यास्त्रमंत्रेणावकुंठ्य पवित्रेषु सू

© Dharmartha Trust J&K. Digitized by eGangotri

लविधयागषडङ्गैश्च संपूज्य षोडशान्तिमाश्च पूजयित्वा तेषु स्व
गं पकुम्भमास्मिन्निक्षिप्य पंचरत्नानि सर्वौषधीश्च निक्षिपेत्
पंचरत्नानि तु हीरकमुक्ताफलनीलपद्मरागमरकताख्यानि
सर्वौषधयस्तु सर्षपकुष्ठहरिद्रादारुहरिद्रालोध्रमुस्तोशी
रप्रियंगुषिलीराख्या ततो नववस्त्रयुगेन छादयेदित्यधिवा
सनं विधाय पूर्वेद्युः साधकः कृतनित्यकृत्यः समयिभिः सार्धं
राज्ञो द्वारपूजां पूर्वकं पूजास्थानं प्रविश्य पूजामंडपं वितानादि

© Dharmartha Trust J&K. Digitized by eGangotri

नै.
पू.
14

भिरलंकृत्य पूजाविष्टरादर्धैर्वितानात पूजाविष्टरपर्य्यंतं शा
न्त्यवतारारभ्यं महापवित्रं आलेपयित्वा ... नप नादिभिस्तंवि
धाय ह्मनपूजावत कुंभस्थापनं कृत्वा चंद्रस्थापनात्म पूजां तंपी
ठपूजां विधाय पंचायतनदेवताः संपूज्य पवित्रैः संभाव्य त
स्मिन्कुंभे देवीमावाह्य सर्वोपचारैरभ्यर्च्य नित्यपूजाक्रमे
णैवरश्मिमहं दं पवित्रैः संभाव्य तदंगादेवतं ग्रागवत्स कृत्वा गुरुं सं
तोष्य तस्मै पवित्रं समर्प्य पूर्णाहुतिं कृत्वा ग्रग्रथे पवित्रार्पणं

© Dharmartha Trust J&K. Digitized by eGangotri

विधाय पूर्ववत्तज्जपास्वर्पणमपि पवित्रधारणं कृत्वा दमनपू
जावत्पशा ऋसमीपिकात् पवित्रदानभोजनताम्बूलदक्षि
णादिभिः परितोष्य जपं विधाय देवीं विसृज्य ब्राह्मणादीन्
भोजनभूरिदक्षिणादिभिस्संतोषयेत् षाणनवस्त्रयुगलाद्या
ममरात्नग्रंथियुक्तानि त्रीणि पवित्राणि कृत्वा प्राग्वदधिवा
सनादि सर्वं कृत्वा नानि देव्यै समर्प्य शेषं समापयेत् इति
पवित्रारोपणविधिः अथ भाद्रपदे मासि पूर्णिमायां के

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰ पू॰ 15

तकपुष्पैः साधिवासं विशेषपूजां कुर्यात् । आश्वयुजे मा
सि शुक्लपक्षप्रतिपत्तिथिमारभ्य पूर्णिमापर्यंतं पंचदशसु
तिथिषु प्रत्यहं नित्यपूजानंतरं नैमित्तिकत्वेन चक्रक्रमेण
श्रीसंपूज्य प्रतिपत्तिथिमारभ्यैकादिवृद्ध्या प्रतिपदि श
तं द्वितीयायां द्विशतं तृतीयायां त्रिशतमित्यादि जपहोमौ
विधाय पूर्णिमायां तद्दिनपंचदशशतजपानंतरं शत
संख्याकमधिकं जपित्वा होमांते शतसंख्यं होमं कुर्यात्

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतिपदादितिथिषुएकादिवृद्ध्यापूर्णायांषोडशकन्यायथा
भवंति तथाकन्यापूजनंचकुर्यात् तत्रप्रत्यहंप्रातःकन्यका
या निमंत्रणंकृत्वापूजाजपहोमांतेतांस्नातांसमलंकृतां
पूजास्थानेमहासनेसमुपवेश्य तस्यांप्रागुक्तविधिनादेवी
मावाह्यसंपूज्य वस्त्रालंकरणभोजनतांबूलदक्षिणादा
नादिभिःपरितोष्यप्रणम्यविसर्जयेत् एवंबहुकन्यापूजनेपि
प्रत्येकंपूजनंकुर्यात् आश्विनेवमासिप्रतिपत्तिथिमारभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

६ नै. नवम्यंतास्तुनवरात्रितिथिषुविशेषपूजांकृत्वा एकादिवृद्ध्याज
पू. पार्थिकंचविधाय कुमारीपूजनंचैकादिवृद्ध्याकुर्यात् नवरात्रेषु
16 कुमारीपूजनेविशेषः प्रतिपद्येकवर्षा द्वितीयायांद्विवर्षा ए
वंनवम्यांनववर्षाकन्यापूज्या तत्रापितिथिकुमारीपूर्वंदि
नपूजिताश्चनवम्यामेकवर्षादि नवकुमार्योयथाभवंति त
थापूजयेत् तासांनामानितुप्रतिपदिशुद्धा द्वितीयायांल
लिता चतुर्थ्यांमालिनी पंचम्यांवसुंधरा षष्ठ्यांसरस्वती

© Dharmartha Trust J&K. Digitized by eGangotri

सप्तम्यां रमा अष्टम्यां गौरी नवम्यां दुर्गा मंत्रास्तु ऐं क्लीं श्रीं
मुद्रायै नमः ऐं क्लीं श्रीं ललितायै नमः इत्यादि नाममंत्रैः पूज
येत् अथवा नवयौवनसंपन्ना यथोक्तलक्षणाः सुवासिनीर्वा
नव वा त्रिशक्तिं पूजयेत् तासां नामानि तु हृल्लेखा गगना रक्ता महो
च्छुष्मा करालिका इच्छा ज्ञान क्रिया दुर्गा चेति अत्रापि मंत्रा
स्तितांते हृल्लेखायै नमः इत्यादयः अत्र पूज्या पूज्यकुमा
रीणां लक्षणानि तत्र प्रथमं पूज्यालक्षणानि श्रीकुलार्णवे

© Dharmartha Trust J&K. Digitized by eGangotri

नै॰ अरोगिणीमपुष्पांगीमक्षतरूपांव्रणवर्जितां एकवंशसमुद्भूतां
पू॰ कन्यांसम्यक्प्रपूजयेत् अथाप्रपूज्याकुमारिकालक्षणानि
17 नैवैव हीनाधिकांगीकुष्ठीचविशीलकुलसंभवां ग्रंथिस्फु
टितशीर्णांगीरक्तपुष्पव्रणांकितां जात्यंधांकेकरांकाणांकु
रूपांतनुलोमशां संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवां
अथफलविशेषपूज्यकुमारीविशेषः ब्राह्मणींसर्वकार्येषु
जयार्थेन्नृपवंशजां लाभार्थेवैश्यवंशोत्थांसुतार्थेशूद्रवंश

© Dharmartha Trust J&K. Digitized by eGangotri

जां दारुणो वांत्यजातीयां पूजयेद्विधिना नरः अत्र नित्यं नैमि
त्तिकं पूजांगा कुमारीं पूजासु उक्तजातिषु पूर्वं पूर्वं लाभे उत्तरोत्त
रा पूज्येति अथ पूज्यस्वासिनीलक्षणानि सुरूपा तरुणी शांता
नुकूला सुदिता शुचिः शंकाहीना भक्तियुक्ता गुरुशास्त्रोपयो
गिनी अलोलुपा सुशीला च स्मिता स्या प्रियवादिनी गुरुदेवत
सक्ता सुचित्ता कौलिकप्रिया विमत्सरा विशेषज्ञा देवताराध
नोत्सुका मंत्रतंत्रसमायुक्ता समयाचारपालिका मनोहरा स

© Dharmartha Trust J&K. Digitized by eGangotri

१८

नै.
पू.

18

दासीगणशक्तिर्गर्वा स्थूलदन्ता॥ कृष्णा रूक्षस्वरा वामिनी लम्ब
स्तनी उग्रा कर्कशा स्त्रव्याकुत्सिताङ्गुलरूक्षिका उग्रा
चाराधनार्थीनाभावहीनाऽलसालसा निद्रासक्ताऽतिदुर्मेधा हीनाङ्गी
रोगव्याधिपीडिता दुर्गन्धाङ्गः खिन्ना मूर्खा वृद्धा उन्मत्ता रहस्याभि
न्न कर्कशा कुत्सितालापा निर्लज्जा कलहप्रिया विरूपोन्मार्ग
गा क्रुद्धा पङ्गवं था विकृतानना ईदृशी मंत्रयुक्ता च शक्तियोगे
विवर्जयेदिति ॥ इयं नवरात्रपूजा चैत्रादिफाल्गुनान्ते षुद्वा

दशमासेषु चैत्राषाढाश्विनपौषाख्यमासचतुष्टये चैत्राश्विन
मासयोर्वाश्विने वा शुक्लपक्षेषु यथाविभवविस्तरं कार्योऽपि
तत्र नवरात्रकरणं शाक्तैर्द्वितीयादिनवम्यंतं सप्तरात्रं पंचम्या
दि त्रिरात्रं वा नक्तं तत्र तिथि कुमारीपूजनादिभिर्नवरात्रोत्सवं
कुर्यात् एवमन्येपि नैमित्तिकपूजाविशेषा बहवः संति नैव
त्रं ग्रंथगौरवभयान्न लिखिताः नैत्त साधकैः गुरुतः शास्त्रत
श्च ज्ञातव्याः अथ कार्तिकमासे पूर्णिमायां क्रमेण देवीस

© Dharmartha Trust J&K. Digitized by eGangotri

१९

19

दी॰
पू॰

मभ्यर्च्य गात्रौ कुंडस्थंडिलादावग्निस्थापनं कृत्वा नित्यहोम
क्रमेणैव कृत्वा पिष्टमयैर्घृतपूरितैः कर्पूरवर्तिदीपितैः प्रदी
पैः सांगायै सावरणायै देवीदीपदानं कुर्यात् तत्र स्वसमे भूतले
सिंदूरादिना विपुलं श्रीचक्रं विरच्य तत्र देवीमावाह्य संपूज्य
मध्ये बिंदुचक्रे षोडशादीपान् शार्कराज्यमिश्रयवगोधू
मादिपिष्टरचितान् कर्पूरगर्भवर्तिकान् घृतपूरितान् प्रज्वा
लितान् मूलविद्यया मूलदेव्यग्रे स्थापयित्वोत्सृज्य नित्या

© Dharmartha Trust J&K. Digitized by eGangotri

दि श्रीचक्रे पूज्यसमस्तदेवताभ्यः ततस्तत्पूजाख्यानेन तन्मंत्रेण

ततदेव्यग्रे एकमेकं दीपंस्थापयित्वोत्सृजेत एतावत्करणापा

क्तौ एकस्मिन्स्वर्णादिभाजनेनवयोनिचक्रं अष्टदलकमलं

वा कुंकुमादिना निर्माय तस्मिन्त्रिकोणरूपानवदीपान्मध्ये

ष्टसुयोनिषु दलेषु वा संस्थाप्य देवीमभ्यर्च्योत्सृज्य समर्पयेत्

अथ मार्गशीर्षमासि पूर्णिमायां कर्पूरयुक्तनारिकेरजलैरर्घ्यं

स्थापनं विधाय गंधपुष्पादिभिः संपूज्य माषपिष्टनिर्मिता

© Dharmartha Trust J&K. Digitized by eGangotri

धूपैर्नैवेद्यं च कुर्यात् अथ ज्येष्ठमासि पूर्णिमायां देवीं संपूज्य
शर्कराढ्यं कंसारं दुग्धं वा गव्यं नैवेद्यं दद्यात् अथ माघेमा
सि पूर्णिमायां शुक्लैः कुसुमैर्वा तिलैर्देवीं सावरणां संपूज्य
शर्कराढ्यं अपूपादि नैवेद्यं च निवेदयेत् अथ फाल्गुणे मा
सि पूर्णिमायां पंकजैः स्वर्णरजतपुष्पैः कल्हारैर्मधूकपु
ष्पैश्च देवीं संपूजयेत् इति श्रीमन्नैमित्तिकपूजा

© Dharmartha Trust J&K. Digitized by eGangotri